**३. द्रव्यं किम् ? तत् कतिविधम् ? कानि च तानि ? नवैव इति अंशस्य टीका लेख्या । अन्धकारस्य द्रव्यत्वखण्डनप्रणाली आलोचनीया।**

उत्तरम् - वैशेषिकदर्शनस्य सिद्धान्तान् अतिसरलेन मार्गेण प्रतिपादयितुं ग्रन्थकारः आचार्यः अन्नम्भट्टः तर्कसंग्रहः इति ग्रन्थं रचितवान् । तत्र न्यायवैशेषिकसम्मतेषु सप्तपदार्थेषु प्रथमः पदार्थो भवति द्रव्यमिति । अस्य द्रव्यस्य लक्षणविषये उच्यते आचार्येण- **'द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा राम्यन्यलक्षणम्'** इति अर्थात् द्रव्यत्वजातिमत्त्वम् अथवा गुणवत्त्वमेव द्रव्यस्य सामान्यलक्षणम्। अतः द्रव्यस्य लक्षणद्वयं भवति – द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वेति । द्रव्यस्य लक्षणत्वात् द्रव्यत्वजातिमत्त्वं द्रव्यात् पृथक् इति अवगम्यते एव। न चेत् द्रव्यत्वविशिष्टं द्रव्यमिति उच्यमाने द्रव्यमेव द्रव्यमिति पुनरापत्तिः स्यात्। न्यायवैशेषिकमते जातिः व्यक्तेः भिन्ना भवति।

तत्र द्रव्यस्य लक्षणनिर्णये समस्या भवति- **'तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मनांसि नवैव'** अर्थात् पृथिवी, अपः, तेजः वायुः, आकाशं, कालः, दिक्, आत्मा, मनः इति नव पृथक् वस्तु द्रव्यमिति वक्तुं युक्तम्। एतेषु वैजात्यबोधः स्पष्टः । एतेषु केचन सावयवाः, केचन निरवयवाः, केचन इन्द्रियग्राह्याः केचन अतीन्द्रिया इति । एवं पारस्परिकवैलक्षण्यसद्भावेऽपि यदि एतानि द्रव्याणि भवन्ति तर्हि गुणादयः अपि द्रव्याणि भवन्तु ।

**'तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि'** इति उक्त्वा अन्नम्भट्टः पृथिव्यादीन् नवैव द्रव्यरूपेण स्वीकृतवान्। अत्र नवत्वस्य पृथिवीत्वादौ अन्वयः बोध्यः, तेन द्रव्यत्वं पृथिवीत्वादिनवोपाध्यन्यतम-व्याप्यमिति लभ्यते । एवकारः अयोगव्यवच्छेदार्थकः इति । अर्थात् नवैव द्रव्याणि नास्ति ततोऽधिकं किञ्चित् दशमद्रव्यमिति । एतेन नवाधिकद्रव्यस्वीकर्तॄणामपि मतं खण्डितं जातमिति बोध्यम् ।

**<u>अन्धकारस्य द्रव्यत्वखण्डनम्</u>** -

मीमांसकैः अन्धकारः दशमद्रव्यत्वेन स्वीकृतः। अतः यदा ग्रन्थकारः नवैव द्रव्याणि भवन्ति इति उक्तवान् तदा मीमांसकः शङ्कते— **'ननु तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नवैव द्रव्याणि'** इति । अन्धकारस्य दशमद्रव्यत्वप्रतिपादनाय ग्रन्थकारेण लीलावतीस्थं श्लोकं प्रदर्शयति-

**तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ।। इति।**

अत्र खलु शब्दः निश्चयार्थकः। तमः चलम् अर्थात् चलनक्रियावत्। नीलम् अर्थात् नीलरूपवत्। परापरविभागवत् नाम परत्वापरत्वविभागादिगुणवदिति। प्रसिद्धानि यानि पृथिव्यादीनि नवद्रव्याणि तेषां वैधर्म्यात् तद्वृत्तिगन्धादिशून्यत्त्ववत्त्वात् पृथिव्यादिभ्यो नवभ्यो भेत्तुं भिन्नं दशमं द्रव्यं भवितुमर्हतीति समुदितार्थः। यथा घटस्य क्रियावत्त्वेन रूपवत्त्वेन अनन्तरोत्पन्नघटापेक्षया परत्ववत्त्वेन, प्रागुत्पन्नघटापेक्षया अपरत्ववत्त्वेन प्रसिद्धजलादिद्रव्यगतविशेषधर्मस्नेहादिशून्यत्वेन च जलाद्यष्टभिन्नद्रव्यत्वं, तथा तमसोऽपि नवद्रव्यभिन्नत्वं बोध्यम्।'नीलं तमश्चलति' अर्थात् नीलवर्णविशिष्टः अन्धकारः गच्छतीति या सर्वजनप्रतीतिः सा अबाधितप्रतीतिः, जाति प्रात्यक्षिकप्रतीतिवलादित्यर्थः। या खलु बाधितप्रतीतिः, न विषयसाधिका बेर भवति, यथा-- शुक्तौ रजतत्वप्रतीतिः। तथा च नीलं तमश्चलतीति प्रत्ययः विशेष्यविशेषणयोः आधाराधेयभावविषयकः, अबाधितप्रत्ययत्वात्, पटवतलमिति प्रत्यक्षप्रत्ययवदित्यनेन क्रियाद्यधिकरणत्वं सिद्ध्यति। ततश्च तमसः द्रव्यत्वं साध्यते अनेन अनुमानेन तमः द्रव्यम्, समवायेन नीलरूपवत्वात् अस्मादादिशरीरवदिति। अतः तमः द्रव्यं भवतीति सिद्धम्।

ननु तमसः द्रव्यत्वे अपि यदि प्रसिद्धेषु एव अन्तर्भावः स्यात् तर्हि तस्य पृथक्त्वेन स्वीकरणं व्यर्थमिति विचिन्त्य पूर्वपक्षिभिः मीमांसकैः पृथिव्यादिषु तस्य अनन्तर्भावः प्रदर्श्यते। तमसः आकाशादिपञ्चके नाम आकाशकालदिगात्ममनःसु अन्तर्भावः न भवति। कुत इति चेत् आकाशादिषु पञ्चसु किमपि रूपं नास्ति। किन्तु अन्धकारे रूपसद्भावात् नान्तर्भाव इति। वायोः स्पर्शः अस्ति किन्तु अन्धकारस्य नास्ति। अत एव वायौ तस्य अन्तर्भावः न भवति। सदागतिमत्त्वाभावादपि वायौ नान्तर्भावः अन्धकारस्य। एवं तेजसः भास्वररूपमस्ति किञ्च उष्णस्पर्शः अस्ति। किन्तु अन्धकारस्य नास्ति। इत्यतः तेजसि अपि अन्धकारस्य अन्तर्भावः नास्ति। एवं शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च जले अपि अन्धकारस्य नान्तर्भावः। किञ्च गन्धवत्त्वाभावात् स्पर्शरहितत्वाच्च पृथिव्यामपि नान्तर्भावः अन्धकारस्य। अतः नवद्रव्येषु अनन्तर्भावात् तमः दशमद्रव्यमिति।

एवं पूर्वपक्षे प्राप्ते उच्यते ग्रन्थकारेण अन्नम्भट्टेन 'तमसस्तेजोऽभावरूपत्वात्' अर्थात् तेजोऽभावान्तर्भावादिति । यत्र यस्मिन् समये तेजः न तिष्ठति तत्र तस्मिन् समये अन्धकारस्य प्रतीतिः भवति । तस्मात् तत्र द्रव्यं, किन्तु अभावे अन्तर्गतमिति । अन्धकारः नास्ति कश्चन वर्णविशिष्टः पदार्थः इति अनुमानेनैव ज्ञायते । अन्नम्भट्टेन उक्तमनुमानं भवति 'तमो न रूपिद्रव्यम्, आलोकासहकृतचक्षुर्ग्राह्यत्वात्, आलोकाभाववत्' इति । आलोकः प्रकाशः, तन्निरपेक्षं यत् चक्षुस्तद्ग्राह्यत्वादित्यर्थः ।

तादृशचक्षुर्जन्यलौकिकप्रत्यक्षविषयत्वादिति तु फलितम् । आलोकाभावो दृष्टान्तः। आलोकाभावो यथा प्रकाशशून्ये देशे प्रकाशं विनैव चक्षुषा गृह्यते । अत एव स न रूपवद्द्रव्यात्मकः, तथा तमोऽपि प्रकाशरहिते देशे प्रकाशं विनैव चक्षुषा गृह्यते, अतः तमोऽपि न रूपवद्रव्यमिति । रूपवद्द्रव्यप्रत्यक्षे तु आलोक सहकृतचक्षुषः कारणत्वनियमात् न च अत्र तथा इति भावः । रूपवद्द्रव्यस्य घटादेश्चाक्षुषप्रत्यक्षप्रमायां आलोकस्य अर्थात् आलोकसंयोगस्य समवायसम्बन्धेन कारणत्वादित्यर्थः । तर्हि किं तम इति चेदुच्यते प्रौढप्रकाशकतेजः समान्याभावस्तम इति । प्रौढप्रकाशकं यत् तेजस्तस्य सामान्याभावः एत तम इत्यर्थः ।

ननु तमसस्तादृशतेजोऽभावात्मकत्वे तत्र रूपवत्ताप्रतीतिः कर्मवत्त्वप्रतीतिश्च कथं ज्ञायते ? अभावे रूपकर्मणोरभावादित्यत आह- 'तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः' इति । अर्थात् तमसि रूपवत्त्वप्रतीतिः कर्मवत्त्वप्रतीतिश्च भ्रान्तिरेव, गगनमण्डले नीलिमाभ्रान्तिवत्, दीपापसरणक्रियाया एव तत्र भानादिति भावः। अतः अन्धकारः न दशमद्रव्यम्, किन्तु द्रव्याणि नवैव इति शम् ।

-- By Sanjoy Barman